B.D. 222.

॥अथलघुवाक्यवृत्तिप्रारंभःशिव॥

१ श्रीगणेशायनमः॥ अथलघुवाक्यवृत्तिप्रारंभः॥ ॥नत्वाश्रीराम
चंद्रारविंदनतत्वेदांतगोचरं॥ कुर्वेपुष्पांजलीटीकांवाक्यवृत्तेरविस्तरां॥
हरवल्लुभागवान्शंकराचार्यः॥ चतुर्लक्षणमीमांसाप्रतिपादितम
पिब्रह्मविद्यांअतिकृपालुतयासंक्षेपतः उपदेष्टुकामः शास्त्रवांछ
न्यायेनउपाधिस्थंब्रह्मदर्शयितुं आत्मनः उपाधित्रयंमध्यप्रथमंस्थू
लोपाधिनिर्दिदर्शयति॥ स्थूलइति॥ ॥
स्थूलोमांसमयोदेहः सूक्ष्मस्याहासनामयः॥ ज्ञानकर्मेंद्रियैः साधंधीप्राणोत्तरगो
॥१॥

२ अज्ञानेकारणंसाक्षीबोधश्लेषोविभासकः॥ बोधाभासोबुद्धिग
नः कर्तास्यात्पुण्यपापयोः॥२॥ श्रीराम॥ साक्षीति॥ साक्षात्ई
क्षतेसोसाक्षिबोधः॥ आत्मनमन्विच्छनृणांप्रविष्टमित्यादिश्रु
तिप्रसिद्धः॥ परमार्थसत्यः॥ परमानंदघनः प्रत्यगात्माकूटस्थः
निर्धारूपोनित्योनोत्पाद्योपाधीनांविभासकः सत्तास्फूर्तिप्रदस्ते
नप्रकाशकइत्यर्थः एवंशुद्धात्मनः स्वरूपमुक्तासंसाराभिमानक
र्तृकस्यजीवात्मनः स्वरूपमाह॥ बोधाभासइति॥ स्वरूपप्रतिबि २

gitized with financial assistance from th
Government of Maharashtra
on 11 June 2017

मोसमयः मांसास्थिरक्तादिप्रधानः देहः आत्मनः स्थूलोपाधिस्या
त्॥ वासनाप्रधानः लिंगदेहः सूक्ष्मोपाधिर्ज्ञातव्यः॥ धीशब्देनमन
सोप्युपलक्षणंप्राणश्चेन्द्रियैकदेशेवग्राह्यप्राणस्यप्राणादयः पंचवृत्त
यः एवंदृश्यादिसमुदायकस्थात्मकंलिंगशरीरंआत्मनः द्वितियो
पाधिरित्यर्थः॥१॥ तृतीयोपाधिमाह॥ ॥ अज्ञानमिति॥ ॥
अनाद्यनिर्वाच्यमज्ञानंकारणोपाधिः स्यात्॥ यज्ञानार्थंएतदुपा
धित्रयमुपक्षिप्यतेतत्रस्थितंशुद्धब्रह्मस्वरूपंनिरूपयति॥ ॥

वितश्चिद्भासः स्वाधिष्ठानः पुण्यपापकर्मणां कर्तास्यात्॥२॥
किंचसएवजीवात्माप्रारब्धकर्मवशात्तद्देहमुत्सृज्यसु
खदुःखभोक्तृत्वादिरूपंसंसारमनुवर्तमनुभवति॥ अतः बोधो
सएवसंवत्सरेकर्मवशाल्लोकद्वयेसञ्चरन्॥ बोधाभासा
शुद्धबोधंविविच्यादतियत्नतः॥३॥ ॥ ॥
भासात्संसारिणःजिवात्शुद्धबोधंकूटस्थंअतिप्रयत्नेनविवि
च्यात्॥ परमार्थसत्येपरमानंदघनसाक्षिणिअविद्याकल्पित

सुषाधिजानेसाक्ष्येमिथ्याभासत्वात्नास्त्येवसाक्ष्येवतुपरमार्थसत्यः
के चलः विद्यतेइतिविवेकदृष्याशुद्धमात्मानेजानीयादित्यर्थः३
किंचजाग्रत्स्वप्नावस्थयोः बोधाभासविडंबनाच्चिदाभासव्यवहारः

जागरस्वप्नयोरेवबोधाभासविडंबना ॥ सुप्तौतुत
ल्लयेशुद्धबोधोजाड्यंप्रकाशयेत् ॥ ४ ॥ ॥ ॥

सुप्तेतुचिदाभासलयात्शुद्धबोधः कूटस्थःजाड्यंअज्ञानंप्रका
शयेत् ॥ सुषुप्तिसमयेसर्वलयेपिकूटस्थचैतन्यंनिर्विकारतयाति

छतीत्यर्थः नहिदृष्टेरदृष्टेर्विपरिलोपोविद्यतेविनाशिजात्
इतिश्रुतेः सुप्तोत्थितस्यस्मरणाज्ञानयोरनुभूयमानयोः परामर्शर
र्शनाच्च ॥ ४ ॥ संप्रतिहस्तप्राप्यमिवकूटस्थचैतन्यंजाग्रदिदर्शयति ॥

जागरेपिधियस्तूर्यंभासशुद्धेनभास्यते ॥ धीब्या
पाराश्चनज्ञास्याच्चिदाभासेनसंयुताः ॥ ५ ॥ ॥

जागरइति ॥ जाग्रदवस्थायामपिबुद्धेस्तूर्यंभावःशुद्धेनअवि
कारिचैतन्येनकूटस्थेनभास्यते ॥ वृत्तिरहितमंतःकरणंशुद्धंचै

तन्येनानुभूयतइत्यर्थः सवृत्तिकांतः करणात्यंचैतन्यदृश्याभास्य
तमाहुः।धिव्यापाराइति॥तद्भास्याः निर्विकारचैतन्यभास्याः
धीव्यापाराः बुद्धिवृत्तयश्चिदाभासेन संयुताः धीस्थजीवेनस

वन्हितप्तंजलंतापयुक्तंदेहस्थतापकं॥चिद्भा
स्याधीस्तदाभासयुक्तान्यंभासयेत्तथा॥ ५॥

हिताभास्यंते॥सवृत्तिमंतः करणं निर्विकारसविकारचैतन्या
भ्यांभास्यते॥निर्वृत्तिकमंतः करणंतुकेवलेननिर्विकारचैतं ४

न्येनैकेनैवभास्यतइत्यर्थः॥५॥चैतन्यदृश्येनभासितेनांतः करणे
बाह्यपदार्थोपलब्धिरर्शयति॥वन्हितप्तमितिवन्हितप्तंसतयथा
जलंतापयुक्तंभवतितथाचिद्भास्याकूटस्थचैतन्येनभाकाशिता
बुद्धिःतदाभासयुक्ताचिदाभासेनप्रकाशिताचसतिअन्येघटा
दिविषयेभासयेत्कूटस्थचिदाभासचैतन्याभ्यांप्रकाशितयाबु
द्ध्याघटादिविषयेज्ञानमुत्पद्यतइत्यर्थः॥५॥बुद्धिगाःक्रियाः
मनोव्यापाराःरूपादिविषयेगुणदोषादीन्विकल्पयंतिताःगु

णदोषविकल्पाः भवेति॥ रूपादिविषयेदृश्यसमीचीनमिदमसमी
चीनमितिकल्पनंमनोव्यापारकृत मित्यर्थः॥ ननुचैतन्यरू
पं तस्यनिर्विकारत्वात्तत्राः क्रियास्तान्मनोव्यापारान्विषयेः
रूपादिगुणदोषादिविकल्पाबुद्धिगाः क्रियाः॥
ताः क्रियाः विषयेसाङ्गभासयंतीत्यितिर्मता॥ ७॥

रूपादिभिः सार्धंभासयंतीप्रकाशयंतीत्यितिः निर्विकारामताए
तेनस्वयंप्रकाशरूपायाश्चितेः असङ्गउ परिछिन्नरूपेरंतः क

वि रूपादिधर्मसंकारंतानसंभवतीतिप्रतियादिने॥ ७॥ किंचसैव
चितेः केवलानिरूपाधित्वात्स्वयंप्रकाशाधिरूपादिविषयात्त
त्रस्थागुणदोषाश्चविविक्ताभिन्नासतीरूपरसादिविषयाणां
रूपाद्यगुणदोषाणांविविक्ताकेवलाचितिः॥
सैवानुवर्ततेरूपरसादीनांविकल्पने॥ ८॥
विकल्पनेनपृथक्कृत्यहणेअंतःकरणशुद्धयधिक्यशात्अनुवर्तते
नस्वतः शुद्धचैतन्यस्यविकाराभावादितिभावः॥ तदुक्तंयोग

वाशिष्ठेयेनत्रादूरसंरूपंगधंज्यानासिराद्यव॥तमात्मानंपरंब्रह्म
जानीहिपरमेश्वरमिति॥जत्रायेपुरुषःस्वयंज्योतिर्भवतीत्या
हिश्रुतयः॥आत्मनःस्वप्रकाशत्वंबोधयंतीत्यर्थः॥८॥श्रीराम
क्षणेक्षणेन्यथाभूताधीविकल्प्याश्रितिर्नृणु॥मुक्ता
मुक्तत्ववद्बुधिविकल्प्येषुचितिस्थिता॥९॥श्रीराम
धीविकल्पाबुद्धिवृत्तयःप्रतिक्षणेअन्यथाभूताःपरिणामिनः
दृश्यंतेचितिस्तुनतथाकूटस्थःपरिणामाभावाद्यतश्चैतन्यस्यनदेव

DR. BHAU DAJI MEMORIAL

दृश्यति॥मुक्ताफलेषुयथासूत्रंअनुस्यूतंएवंबुद्धिवृत्तिषुचितिः
अनवरतमनुस्यूतत्वेनस्थितात्वेननजडपरिणामिदृश्यरूपाभो
बुद्धिवृत्तिभ्यःचिदात्मेदघनअपरिछिन्नसाक्षिस्वरूपेभिन्नेवि
द्यतइतिज्ञेयं॥९॥तदेवशुद्धंचैतन्यात्मकूटस्थस्वरूपेयूयंमनस्त
ष्टमुपपादयति॥मुक्ताभिरितियथामुक्ताभिरावृतेआछादितेसू
त्रेमुक्तयोर्बुद्धयोमुक्ताफलयोर्मध्ये
ध्यतेस्फुटंभासतेतथाविकल्पैर्बुद्धिवृत्तिभिरावृताछादिताचि

DR. BHAU DAJI MEMORIAL

तूकूटस्थचैतन्यंविकल्पयोबुद्धिवृत्तेर्मध्येस्फुरणंसतिप्रकाशो
ते॥तदुक्तंविद्यारण्यश्रीपादैः॥यंचरद्राघवकण्ठ्यसंधयोविल
वृत्तिनामभावाश्चावभासिताः निर्विकारेणयेनासौकूटस्थइति
मुक्ताभिरावृतेसूत्रंमुक्तयोमध्यदृश्यते॥तथा
वृत्ताविकल्पेश्चित्स्फुरणमध्येविकल्पयोः॥९॥
चोच्यते॥जनःबुद्धिवृत्तिसंधिषुसाक्षिशुद्धचैतन्यानुभवोभ
वतीतिभावः॥९०॥॥किंच॥बुद्धिवृत्तिरूपपूर्वविकल्पेनरुद्धे

सतियावत्बुद्धिवृत्तिरूपस्योत्तरस्यविकल्पस्योदयःआविर्भा
वोनभवतितावत्स्वरूपंनिर्विकल्पकचैतन्यंशुद्धात्मस्वरूपंशुद्ध
बोधरूपंविभासतेनिर्वृत्तिकमेतःकरणेशुद्धचैतन्यस्वरूपेणरु
द्धेपूर्वविकल्पेतुयावदुत्तरस्योदयः॥नि
र्विकल्पकचैतन्येस्वरूपंतावद्विभासते॥११॥
रुद्धेनानुदयतइत्यर्थः॥जनएवोक्तंजागरेपिधियस्तूष्णींभावशु
द्धेनभास्यतेइति॥९॥॥श्रीरामचंद्र॥७॥७

एवंअनुभवःशुद्धांतःकरणेःसंपादनीयइत्याह॥ एकेति॥ ब्रह्मा
नुभवकांक्षिभिःमुमुक्षुभिः एकद्विनिक्षणेनएवमनुक्रमेणप्रय

एकद्विनिक्षणेनैवविकल्पस्यनिरोधने॥ क्रमे
णाभ्यस्यतांयत्नाद्ब्रह्मानुभवकांक्षिभिः॥१२॥

तान्विकल्पस्यअंतःकरणवृत्तिमात्रस्यनिरोधने॥ अभ्यस्यतां
अंतःकरणेनिर्वृत्तिंकृत्वाशुद्धचैतन्यस्वरूपानुभवोसौनिनानुभ

वितुंशक्यतइत्यर्थः॥ १२॥ एतदेवप्रतिपादयन्नाह॥सविकल्प
कजीवइति॥ गुरुशास्त्राद्युपदेशात्त्वंमयंसविकल्पकश्चैतन्यरू
पोजीवः॥ज्ञानोपदेशासमर्थोयंअहंब्रह्मेतिमाहावाक्यानुभवेनिर्वि

सविकल्पकजीवोयंब्रह्मस्यान्निर्विकल्पकं॥
अहंब्रह्मेतिवाक्येनसोयमर्थोनिधीयते॥ १३॥

कल्पकंशुद्धसच्चिदानंदस्वरूपंब्रह्मैवस्यात्सोयंउपनिषद्भिःप्र
तिपादितोर्थःअस्मिन्नुपायेनिधीयतेप्रतिपाद्यते॥यथारज्जुसर्पः

रज्जुतिरिक्तोनास्ति एवंजीवोपिब्रह्मव्यतिरिक्तोनास्तीत्येवंवेदांतम
र्यादेत्यर्थः॥१३॥किंच॥सविकल्पकश्चैतन्यरूपोपिजीवःनिर्वृति
कअंतःकरणेभ्यासवशात्कृतेसतिनिर्विकल्पकंशुद्धबोधस्वरू
सविकल्पकचिद्योहंब्रह्मैकंनिर्विकल्पकं॥स्वतः
सिद्धाविकल्पास्तेनिरोधव्याःप्रयत्नतः॥१४॥
पंएकमरवंअद्वैतंचभवतिअतःस्वतःसिद्धाःविकल्पाःअंतःकरण
वृतयःप्रयत्नतःवृत्युसंतिनिरासेननिरोद्धव्याःवृत्तिरहितेंतःकरणे

शुद्धंचैतन्यरूपेंअनुभूयतेअतःवृत्तिरहितमंतःकरणंकृत्वाम
मुरवमरवंउमनुभूयतामीत्यर्थः॥१५॥तदेवोपपादयति॥रा
ज्यदृत्ति॥यदिसर्ववृत्तिनिरोधःराजयोभवेत्तर्हिज्ञानिनोवसिष्ठा
दीनांप्रियदृष्टःसमाधिरवस्यात्अतःतदराजोसर्वदांतःकरण
वृत्तिनिरोधासामर्थेसतीक्षणंरुध्वाक्षणमात्रमपिवृत्तिनिरोधंकृ
त्वामनःब्रह्मताश्रुत्याअनुसंधेया॥तथाचश्रुतिः॥यदापंचा
वतिष्ठंतेज्ञानानिमनसासह॥बुद्धिश्चनविचेष्टतितामाहुःपरमां

गति॥ तोयोगमिति मन्यते स्थिरामिंद्रियधारणा॰ अप्रमत्तस्तदा भव
तियोगो हिप्रभवाप्ययाविति॥ १५॥ श्रद्धालुः मुमुक्षुः स्वात्मनः ब्र
ह्मतांबुद्धिवृत्तिभिरात्माकाराकारिताभिरंतः करणवृत्तिभिश्चिं
द्रूक्यः सर्वनिरोधश्चतत्समाधिर्ज्ञानिनोप्रियः॥
तदशक्तोक्षणंरुध्वाश्रद्धयाअलतात्मनः॥१५॥
तयनूस्वीयअल्पसुखमात्माकारांतःकरणेनजानियादित्यर्थः
एवंयथाबुद्धानुसारेणवाक्यवृत्याक्यवृत्तिंयथाबलोचनेनयद्य

महावाक्यमावृत्यास्वस्यब्रह्मत्वमेकाग्रतयाज्ञात्वासदाभ्यस्यतो॥ जा
सुषेरंभृतःकालंनयेद्वेदांतचिंतयादशानावसंक्षिप्तकामादिना
श्रद्धानुब्रह्मतांस्वस्यचिंतयेद्बुद्धिवृत्तिभिः॥ वाक्यवृत्या
यथाशक्तिज्ञात्वाद्याभ्यस्यतासदा॥१६॥तच्चिंतनं
तत्कथनंअन्योन्यंतत्प्रबोधनं॥एतदेकपरत्वंच
ब्रह्माभ्यासंविदुर्बुधः॥१७॥ श्रीरामचंद्र॥
मनागधिद्वतिवचनात्॥१६॥ ॥तदेवाभ्यासस्वरूपंदर्शयति

तच्चिंतनमिति॥ मनसा विषयोत्तरनिरासेनतस्यग्रहणएवचिं
तनंतस्येवकथनंवेदांतवाक्यजातंतस्येवजन्योन्यंबोधनप्रका
रः एतदेकपरत्वेशुद्धंचैतन्येकपरमाज्ञानंतमेवैकंजानथा॥ आ
त्मानमन्याश्चोविमुंचथामृतस्यैषसेतुरितिश्रुतेः॥ एतत्सर्वं
ब्रह्मोपासनलक्षणमाचार्यैप्रतिपादितमित्यर्थः॥ १७॥ ६५॥
अथाभ्यासफलमाह॥ देहात्मधीवदिति॥ यथादेहात्मबुद्धिर्दृढ
तरासंतथाब्रह्मात्मबुद्धिर्दृढ्यसंतिकृतकृत्यतमित्यर्थः॥ १९

तदुक्तमुपदेशसाहस्र्यांदेहात्मज्ञानवदृढत्वेनदेहात्मज्ञानबाधकं
आत्मन्येवभवेद्यस्मात्तेनछिनत्तिमुञ्चतइतिएवंयदातदायं
म्रियतोपचमूनात्मकदेहंचुकंपरित्यज्य
देहात्मधीवब्रह्मधीरादर्ढ्यंकृतकृत्यता॥ यदात
दायंम्रियतोमुक्तोसेनात्रसंशयः॥ १८॥ अथा-
परिछिन्नब्रह्मस्वरूपेणनिष्ठत्वएवंभूतावस्थेवविदेहमुक्तिरित्य
र्थः॥ आत्मज्ञानान्नान्यत्परंविद्यतइति॥ ब्रह्मवेदब्रह्मैवभवतिभिद्यतेहृद

यत्नोऽस्मिन्निच्छतेनसर्वसंन्यासः॥ हीयतेनचास्यकर्माणिनास्मिन् दृष्टे
परावरे॥ अध्यात्मयोगाधिगमेनदेवमत्वाधीरोहर्षशोकौजहातिद्

इतिश्रीमदाचार्यविरचितेलघुवाक्यवृत्तिसंपूर्णे

स्याद्विश्रुतयः आत्मविदः अनर्थ हानिमात्मस्वरूपसुख
प्राप्तिंचप्रतिपादयतीत्यर्थः॥ अतएवाभीसमस्तेशोकः सोके
नपतिविमुः॥ संतस्तमेवमच्छेतुयदत्वस्तवलितेमम॥ इत्यपुष्पांज १२

लीटिकोभावार्थश्चरणाज्ञेयाः॥ पुण्यमयाजिज्ञासिकिंचिन्नत्व
ज्ञिसमर्पितं॥ इतिश्रीलघुवाक्यवृत्तिटिकायांपुष्पांजल्यभिधा
यांवेदांतप्रकरणंसंपूर्णं॥ बृहदारण्यकेः॥ तंपदार्थविवेकायसन्या
सः सर्वकर्मणां॥ श्रुत्याविधीयतेयस्मात्तत्यागीपतितोभवेत्॥१॥
शिरवासत्नपरित्यागीवेदांतश्रवणंविना॥ विद्यमानोधिसंन्या
सीपतत्येवनसंशयः॥२॥ संसारिकसुखासक्तोब्रह्मज्ञोस्मीतिवादिते॥ कर्मब्रह्मोभयभ्रष्टस्तंत्यजेदंत्यजंयथा॥३॥ ७॥

gitized with financial assistance from th
Government of Maharashtra
on 11 June 2017

॥इतिलघुवाक्यवृत्तिसमाप्तमिदम्॥